**दिनाङ्कः-02.05.2025** **सायम् - 06:20**

**मुख्यवार्ता :-**

- प्रधानमंत्री नरेंद्रमोदी ऑस्ट्रेलियायाः प्रधानमंत्री एंथनी-अल्बानी च द्वयोर्देशयोः मध्ये व्यापक-रणनीतिक-सहयोगं सुदृढं कर्तुं स्वकीयां प्रतिबद्धतां पुष्टीकृतवन्तौ ।
- राष्ट्रिय-सुरक्षा-परामर्शदः अजीत-डो**भालः** प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना सह मिलितवान्, रक्षासचिवः गोविन्दमोहनः च राज्याणां मुख्यसचिवैः सह श्वः भविष्यमाणाय मॉक-ड्रिल इत्यस्मै उपवेशनं कृतवान् ।
- आतङ्कवादविरुद्धयुद्धे भारतस्य समर्थनाय अमेरिकादेशः सर्वविधप्रयत्नं करिष्यतीति संयुक्तराज्य-प्रतिनिधिसभायाः अध्यक्षः माइक-जॉन्सनः उक्तवान् ।
- विदेशमंत्री डॉ. एस्-जयशंकरः **प्रोक्तवान् यत्** प्रतिभायाः वैश्विका**नुरोधः सुदृढः अस्ति अपि च एतस्य आपूर्तये भारतस्य स्थितिः सुदृढा अस्ति ।**
- भारतीय-**ऋतु-विज्ञान**-विभागः **आगामिषु द्वि-त्रितय-दिवसेषु** गुजराते राजस्थाने **च तीव्र-वायुवाहेन सह प्रचण्ड-वृष्टेः** अनुमानं **व्यक्तीकृतवान् ।**

**पीएम – ऑस्ट्रेलिया (HL-1)**

प्रधानमंत्री नरेंद्रमोदी अद्य ऑस्ट्रेलियायाः प्रधानमंत्रिणा एंथनी-अल्बानी इत्यनेन सह वार्तां विधाय तस्मै द्वितीयैतिहासिक-कार्यकालाय वर्धापनम् अयच्छत् । वार्तावधौ ,उभावेव प्रधानमंत्रिणौ द्वयोर्देशयोः मध्ये व्यापक-रणनीतिक-सहयोगं सुदृढं कर्तुं स्वकीयां प्रतिबद्धतां पुष्टीकृतवन्तौ ।उभौ अवदताम् यत् पंचवर्षाणां स्वीकीयकार्यकालावधौ व्यापक-रणनीतिक-व्यवहारेण विभिन्न-क्षेत्रेषु सुदृढ-सहयोगः विकसितोऽभवत् । द्वावेव नेतारौ विपक्षीय-संबंधान् सुदृढं कर्तुं भारतीय-मूलस्य प्रवासिभिः निर्वोढायां भूमिकां बलं प्रायच्छताम् । उभौ एव पारस्परिकहितानां क्षेत्रीयेषु वैश्विकेषु च प्रकरणेषु विचाराणां आदान-प्रदाने कृतवन्तौ अपि च एकस्य स्वतंत्रस्य, स्थिरस्य, नियम-आधारितस्य , समृद्धस्य च हिंद-प्रशांतस्य समर्थनं कुर्वन्तौ सम्मिल्य कार्यं कर्तुं स्वकीयां प्रतिबद्धतां पुनरुच्चारितवन्तौ। श्रीमोदी अस्य वर्षस्य अन्ते भारते समायोक्ष्यमाणे वार्षिक-शिखर-सम्मेलने क्वाड-शिखर-सम्मेलने च भागं भजितुं प्रधानमन्त्रिणे अल्बानियाई इत्यस्मै भारतयात्रां विधातुम् आमंत्रितम् अकरोत् ।

**नागरिक-सुरक्षोद्धारम् (HL-2)**

केंद्रीय-गृह-सचिवः गोविंद-मोहनः अद्य दृश्य-सम्वादमाध्यमेन राज्याणां केंद्र-शासित-प्रदेशानां च मुख्य-सचिवैः सह उपवेशनम् अकरोत् । उपवेशने नागरिक-सुरक्षायाः महानिदेशकैः राष्ट्रीय-आपद्-प्रतिक्रियाबलेन च सह राष्ट्रीय-राजधान्यां अन्ये वरिष्ठाधिकारिणः भागमभजन् । ह्यः, केंद्रं राज्यसर्वकारान् देशे नागरिक-रक्षा-सज्जानां मूल्यांकनं कर्तुं मॉक-ड्रिल इत्यस्य आयोजनाय अकथयत् । अस्य अभ्यासस्य योजना ग्रामीणस्तरं यावत् विनिर्माता अस्ति । अस्माकं संवाददाता संसूचितवान् यत् नागरिक-रक्षाभ्यासस्य उद्देश्यं विभिन्न-नागरिक-रक्षोपायानां परिचालनस्य प्रभावात्मकतायाः , समन्वयनस्य आकलनं करणीयमस्ति ।

**एनएसए-पीएम-समागमः:- (HL-2)**

पहलगाम-आतङ्क्याक्रमणस्य अनन्तरं उच्चस्तरीय-समागमस्य श्रृङ्खलायां राष्ट्रिय-सुरक्षा-परामर्शदः अजीत-डोभालः अद्य नवदिल्लीनगरे स्वनिवासस्थाने प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना सह मिलितवान्। ह्यः रक्षासचिवः राजेशकुमारसिंहः प्रधानमन्त्रिणा सह सम्पर्कं कृतवान् आसीत् । ततः पूर्वं वायुसेनाप्रमुखः एयर्-चीफ्-मार्शल अमरप्रीतसिंहः अपि श्रीमोदिना सह समागमं कृतवान्। अवधेयमस्ति यत् इतः पूर्वं नौसेना-प्रमुखेन एडमिरल दिनेश-के-त्रिपाठी इत्यनेन अथ सेना-प्रमुखेन जनरल-उपेन्द्र-द्विवेदिना सह पृथक्तया संगोष्ठी जातासीत् ।

**अमेरिका-पहलगाम (HL-3)**

आतङ्कवादविरुद्धयुद्धे भारतस्य समर्थनाय अमेरिकादेशः सर्वविधप्रयत्नं करिष्यतीति संयुक्तराज्य-प्रतिनिधिसभायाः अध्यक्षः माइक-जॉन्सनः उक्तवान् । सः उक्तवान् यत् भारतदेशः अमेरिका-देशस्य अतीव महत्त्वपूर्णः सहयोगी वर्तते । भारत-अमेरिका-देशयोः व्यापारसन्धीनां विषये अपि सः उक्तवान्, द्वयोः राष्ट्रयोः मध्ये व्यापारवार्ता सामञ्जस्य-स्थापनस्य कार्यं करिष्यति इत्यपि सः आशां प्रकटितवान् । श्री-जॉन्सनः उक्तवान् यत्, पहलगाम-आतङ्कवाद-आक्रमणस्य अनन्तरं ट्रम्प-प्रशासनेन भारतस्य आतङ्कवाद-विरुद्ध-युद्धस्य समर्थनं प्रकटितम्, यस्मिन्नाक्रमणे षड्विंशति-जनानां प्राणाः कालग्रासभूताः, अन्ये च केचन जनाः व्रणिताः अभवन्।

**जयशङ्करः-गति (HL-4)**

विदेशमंत्री डॉ. एस्-जयशंकरः प्रोक्तवान् यत् प्रतिभायाः वैश्विकानुरोधः सुदृढः अस्ति अपि च एतस्य आपूर्तये भारतस्य स्थितिः सुदृढा अस्ति । अद्य नवदिल्ल्यां **गति** इत्यस्य शुभारंभावसरे कथयन् , डॉ. जयशंकरः प्रावोचत् यत् वैश्विक-कार्यस्थलस्य कार्यबलस्य च उद्भव-कारणेन विदेशेषु अवसरान् अभिलक्ष्य समधिकं ध्यानं प्रदातव्यम् ।

मंत्रिवर्यः अकथयत् यत् सर्वकारेण समकालीनयुगे भारतीय-कार्यबलानि अधिकोत्पादकं विधातुं कौशल-प्रशिक्षणस्य, व्यावसायिक-शिक्षायाः च प्रयासानां एका श्रृंखला समारब्धा अस्ति ।

**आईएमडी: (HL-5)**

भारतीय-ऋतु-विज्ञान-विभागः आगामिषु द्वि-त्रितय-दिवसेषु गुजराते राजस्थाने च तीव्र-वायुवाहेन सह प्रचण्ड-वृष्टेः अनुमानं व्यक्तीकृतवान् । आकाशवाण्या सह जाते सम्वादे , वरिष्ठ-ऋतुवैज्ञानिकः, आर.के. जेनमणिः इत्यसौ अकथयत् यत् पश्चिम-हिमालय-क्षेत्रेषु झाञ्झावातेन विद्युत्पातेन च सह ऋतोः समाना एव स्थितिः द्रक्ष्यते ।

**संयुक्तराष्ट्रसुरक्षापरिषद्-पहलगाम**

संयुक्तराष्ट्रसुरक्षापरिषत् पिहित-द्वारसत्रे पहलगाम-आतङ्कवाद्याक्रमणस्य विषये पाकिस्तानदेशेन प्रश्नपृच्छामकरोत् । भारत-पाकिस्तानयोः मध्ये वर्धमानस्य विद्वेषभावस्य मध्ये इदम् अधिवेशनम् अभवत् । प्राप्तसूचनानुसारं संयुक्तराष्ट्रसङ्घस्य अनेके सदस्याः पाकिस्तानस्य आलोचनां कृतवन्तः, अथाक्रमणे पाकिस्तानस्य आतङ्कवादि-समूहस्य लश्कर-ए-तैबा इत्यस्य भूमिकायाः विषये चिन्ताम् अपि उत्थापितवन्तः। संयुक्तराष्ट्रसङ्घस्य अध्यक्षेण इवान्जेलोस् सेकेरिस् इत्यनेन उक्तं यत् सभैषा बहूत्पादिका सहायिका चासीत् । सः शान्तेः प्रतिस्थापनाय संयुक्तराष्ट्रसुरक्षापरिषदः पात्रतां सबलं प्रतिपादितवान् ।

**पहलगाम-आक्रमण-विश्वव्यापी-विरोधाः**

जघन्य-पहलगाम-आतङ्की-आक्रमणे पीडितैः सह एकतां प्रकटयितुं विश्वे भारतीयसमुदायाः शान्तिपूर्ण-सभाः प्रार्थना-सभाः च निरन्तरं कुर्वन्ति। इमानि वैश्विकप्रदर्शनानि हिंसायाः एकीकृतनिन्दां, आतङ्कवादस्य सम्मुखे शान्तेः न्यायस्य च समाह्वानं प्रतिबिम्बयन्ति। संयुक्तराष्ट्रसंघस्य जॉर्जियादेशस्य भारतीयसमुदायेन अट्लाण्टानगरे आतङ्क-विरोधी-सभायाः आयोजनं कृतम्, यत्र हि अमेरिकीकाङ्ग्रेस-सदस्यः रिच्-मेक्-कॉर्मिकः अपि आतङ्कवादस्य निन्दां कृत्वा अतिवादी-हिंसायाः निवारणे अन्ताराष्ट्रियैकतायाः आह्वानं कृतवान् । शिकागोनगरे शौमबर्ग्-नगरस्य नेशनल्-इण्डिया-केन्द्रे अनेक-भारतीयसङ्घानामुपस्थितौ एकः महान् समागमः अभवत् यत्र भारतीय-महा-वाणिज्यदूतः सोमनाथ-घोषः एकतायाः, स्मरणस्य, संकल्पस्य च सन्देशं प्रदत्तवान् । न्यूयॉर्क-नगरे सेण्ट्-मेरी-आर्थोडॉक्स-चर्च-मध्ये गभीर-प्रार्थना-समागमः अभवत्। एवमेव स्पेनदेशे, कनाडादेशे, स्वीडेन् देशे च तत्तद्देशीयाः पहलगामाक्रमणे पीडितेभ्यः शोकं प्रकटयितुम् आतङ्कवादविरुद्धं भारतस्य समर्थनाय सभाः अभवन् ।

॥ इति वार्ता ॥